संस्कृत-वार्ता:

23.08.2024

सायम् - 06:20

मुख्यवार्ता:

· प्रधानमन्त्री नरेन्द्रमोदी यूक्रेनदेशस्य द्विदिवसीय-यात्राया: द्वितीये अन्तिमे च चरणे अद्य कीवनगरं प्राप्तवान्। प्रधानमन्त्रिणा नरेन्द्रमोदिना यूक्रेनदेशस्य राष्ट्रपतिना वोलोडिमिर्-ज़ेलेन्स्कीइत्यनेन सह प्रतिनिधिस्तरीयसम्मेलनं कृतम्।

· रक्षामन्त्री राजनाथसिंह: अवोचत् यत् भारतामेरिका-देशौ स्वाभाविकौ सहयोगिनौ स्त:। अपि च द्वयोर्मध्ये सहभागित्वं सुनिश्चितमस्ति।

· राष्ट्रेणाद्य स्वकीय: प्रथमान्तरिक्षदिवस: आचर्यते। विगतवर्षे अस्मिन्नेव दिवसे चन्द्रयान-तृतीयाभियानेन चन्द्रमस: तले विक्रमलेण्डर इत्यस्य सुरक्षितं सौम्यावतरणं च सम्पूरितम्। अनया महदुपलब्धिना सह भारतम् अन्तरिक्ष-यात्रिणां देशानां विशिष्टसमूहे समाविष्टम्।

· शिक्षामन्त्रालयेन सर्वेभ्य: राज्येभ्य: केन्द्रशासितप्रदेशेभ्यश्च एकविंशत्यधिकद्विसहस्र-तमवर्षस्य विद्यालयीय-सुरक्षा-दिङ्निर्देशस्य अनुपालनाय निर्देश: प्रदत्त:।

· अमेरिकादेशस्य उपराष्ट्रपति-पदासीना कमला हैरिस् चतुर्विंशत्यधिक-द्विसहस्रतमस्य वर्षस्य डेमोक्रेटिक-पार्टीति दलस्य राष्ट्रपतिपदस्य नामाङ्कनम् औपचारिकरूपेण स्वीकृतवती।

******

प्रधानमन्त्री-यूक्रेनयात्रा

अद्य युक्रेन्-देशस्य कीव्-नगरे प्रधानमन्त्रिणा नरेन्द्रमोदिना युक्रेन्-देशस्य राष्ट्रपतिना वोलोडिमिर् ज़ेलेन्स्की इत्यनेन सह प्रतिनिधिस्तरीयसम्मेलनं कृतम्। उभयो : नेत्रयो: उपस्थितौ चतुर्षु सहभागिता ज्ञापन पत्रेषु हस्ताक्षराणि आदानप्रदानानि च जतानी। युक्रेन्-देशे सामुदायिकविकासपरियोजना- मादकद्रव्य- नियन्त्रणमानक-, सांस्कृतिक- इत्यादिशु विविधक्षेत्रेषु द्वैपाक्षिकसंबन्धान् सुदृढं कर्तुं ज्ञापन पत्रेषु हस्ताक्षराणि कृतानि। प्रधानमन्त्री नरेन्द्रमोदी पौलैण्डयूक्रेन-देशयो: द्विदिवसीय-यात्राया: द्वितीये अन्तिमे च चरणे अद्य कीवनगरं प्राप्तवान्। प्रधानमन्त्री कीवनगरं रेलयानेन गत:। कीवनगरं सम्प्राप्य प्रवासिभरतीयै: प्रधानमन्त्रिण: भव्यं स्वागतं व्याहृतम्। अत्रावसरे प्रधानमन्त्री श्रीमोदी कीव इत्यत्र यूक्रेनस्य

राष्ट्रिय-इतिहास-संग्रहालये बालेभ्य: निर्मितां मल्टिमीडिया-माटिरोलॉजिस्ट-प्रदर्शनीम् अवलोकितवान्। तेन सह यूक्रेनस्य राष्ट्रपति: वलोडिमिर-जेलेंस्की इत्येष: आसीत्। उभौ नेतारौ बालानां स्मृते: सम्मानं कृतवन्तौ। सङ्घर्षे दिवङ्गतानां बालानां स्मृतौ नियोजिताया: प्रदर्शन्या: प्रधानमन्त्री नरेन्द्रमोदी प्रभावितो जात:। अपि च दु:खं प्रकटयन् तेषां स्मृतौ एकं क्रीडनकमपि तत्र स्थापितवान्। इत: प्राक् प्रधानमन्त्री नरेन्द्रमोदी कीवनगरे महात्मागान्धिन: प्रतिमायां पुष्पाञ्जलिं समर्पितवान्। तदनन्तरं समन्वययुतस्य समाजस्य निर्माणे महात्मागान्धिन: शान्तिसन्देशस्य नित्य-प्रासङ्गिकतामपि रेखाङ्कितवान्।

******

<u>राजनाथसिंह:</u>

रक्षामन्त्री राजनाथसिंह: अवोचत् यत् भारतामेरिका-देशौ स्वाभाविकौ सहयोगिनौ स्त:। अपि च द्वयोर्मध्ये सहभागित्वं सुनिश्चितमस्ति। अमरीका-देशस्य आधिकारिकयात्राया: प्रथमे दिने श्रीसिंह: वॉशिङ्गटननगरे भारतीयप्रवासिन: सम्बोधितवान्। असौ अत्रावसरे हर्षमपि अनुभूतवान्। यतो हि तत्रस्था: भारतीयसमुदाया: निज-सांस्कृतिकमूल्यै: सह योजितास्सन्ति। भारतीयार्थव्यवस्थायै विकासात्मक-सम्भावना: प्रकाशयन् श्रीसिंह न्यगादीत् यत् भारतदेश: सप्तविंशत्यधिक-द्विसहस्रतमवर्षं यावत् तृतीया बृहत्तमार्थव्यवस्था भवेदिति। रक्षानिर्यातप्रसङ्गेऽपि मन्त्रिणा निगदितं यत् रक्षानिर्यातेन साम्प्रतं एकविंशतिसहस्रकोटिरूप्यकाणि अधिगतानि। राजनाथसिंहेन भारतामेरिकादेशयो: आपूर्ति-व्यवस्थाया: सुरक्षापत्रेषु सम्पर्काधिकारिणां नियुक्तिसम्बन्धेऽपि एकं सहभागित्व-ज्ञापनपत्रे हस्ताक्षरं कृतम्।

******

<u>राष्ट्रियान्तरिक्ष दिवस:</u>

राष्ट्रेणाद्य स्वकीय: प्रथमान्तरिक्षदिवस: आचर्यते। विगतवर्षे अस्मिन्नेव दिवसे चन्द्रयान-तृतीयभियानेन चन्द्रमस: तले विक्रमलैण्डर इत्यस्य सुरक्षितं सौम्यावतरणं च सम्पूरितम्। अनया महदुपलब्धिना सह भारतम् अन्तरिक्ष-यात्रिणां देशानां विशिष्टसमूहे समाविष्टम्। अपि च चतुर्थ: देश: जात: सहैव चन्द्रमस: दक्षिणध्रुवं निकषा अवतरित: प्रथम: देशो जात:। राष्ट्रपति:, उपराष्ट्रपति:, प्रधानमन्त्री च अत्रावसरे देशवासिभ्य: शुभकामना: अयच्छन्। अस्य वर्षस्य अन्तरिक्षदिवसस्य विषयो विद्यते चन्द्रस्पर्शनेन जीवनस्पर्शनम्-भारतस्य अन्तरिक्षकथा इति। य: समाजे प्रौद्योगिक्यां च अन्तरिक्षान्वेषणस्य गहनप्रभावाय बलं प्रददाति। अद्य प्रात: नवदिल्ल्या: भारतमण्डपस्थाने अत्रावसरे आयोजिते मुख्यसमारोहे सम्बोधयन्ती राष्ट्रपति: द्रौपदीमुर्मु: प्रोक्तवती यत् भारतीयान्तरिक्षानुसन्धानसङ्घटनेन न केवलम् अन्तरिक्षक्षेत्रे अपितु देशस्य

सामाजिकार्थिकविकासेऽपि सुदृढं योगदानं प्रदत्तम्। तदनु अन्तरिक्ष-राज्यमन्त्री डॉ० जितेन्द्र सिंह: प्रोक्तवान् यत् नरेन्द्रमोदिन: प्रशासनेन अन्तरिक्षक्षेत्रस्य विमुक्तये भूतकालिकसीमान: विखण्डिता:। भारतीयान्तरिक्षानुसन्धनसङ्घटनस्य अध्यक्ष एस्० सोमनाथ: अभिव्यक्तवान् यत् राष्ट्रियान्तरिक्षदिवसावसरे जनानां मनसि महदुत्साहं दरीदृश्यते।

******

## शिक्षामन्त्रालय: - दिङ्निर्देश:

शिक्षामन्त्रालयेन सर्वेभ्य: राज्येभ्य: केन्द्रशासितप्रदेशेभ्यश्च एकविंशत्यधिकद्विसहस्र तमवर्षस्य विद्यालयीय-सुरक्षा-दिङ्निर्देशस्य अनुपालनाय निर्देश: प्रदत्त:। अयं दिङ्निर्देश: मन्त्रालयस्य विद्यालयीय-शिक्षा-साक्षरता-विभागद्वारा पोस्को इत्यस्य दिङ्निर्देशानुरूपं विकसित:। एतस्मिन् निर्देशे सर्वकारीयविद्यालयेषु सर्वकारीयेतरविद्यालयेषु च अध्ययनरतानां बालानां सुरक्षां निधाय विद्यालयप्रबन्धनस्य प्रत्युत्तरस्य प्रावधानं निहितमस्ति।

******

## कमला-हैरिस्

अमेरिकादेशस्य उपराष्ट्रपतिपदासीना कमलाहैरिस: चतुर्विंशत्याधिक-द्विसहस्रतमस्य वर्षस्य डेमोक्रेटिकपार्टीति दलस्य राष्ट्रपतिपदस्य नामाङ्कनम् औपचारिकरूपेण स्वीकृतवती। शिकागोनगरे चतुर्दिवसात्मकस्य डेमोक्रेटिक नेशनल कन्वेंशन इत्येतस्य अन्तिमे दिवसे ह्य: रात्रौ कमलाहैरिस: सभां सम्बोधितवती। असौ मतदातॄन् नूतनं मार्गं प्रशस्तीकर्तुं आमन्त्रितवती। ध्यानास्पदं तथ्यमिदं यत् यदि असौ विजयं प्राप्स्यति तर्हि एषा अमेरिकादेशस्य प्रथममहिला राष्ट्रपति: भविष्यति।

******

## त्रिपुरा-जलाप्लव:

केन्द्रेण राज्ये जलाप्लावस्य स्थितिं दृष्ट्वा त्रिपुराय चत्वारिंशत्-कोटि-रुप्याकाणि अनुमोदितानि। राज्यापत्प्रतिक्रिया-कोषात् अनुमोदित: राशि: प्रभावितजनेभ्य: साहाय्याय वर्तते। सामाजिकसञ्चारपटले केन्द्रीयगृहमन्त्री अमितशाह: उक्तवान् यत् केन्द्रेण प्रेषितानि राष्ट्रियापत्प्रतिकारबलस्य एकादशदलानि स्थल-सेनाया: त्रीणि दलानि, वायुसेनाया: चत्वारि उदग्रयानानि च प्रागेव साहाय्योहदारकार्येषु राज्यप्रशासनस्य साहाय्याय संलग्नानि सन्ति।

******

आर्०जी०कर्

पश्चिमबङ्गाले आर्०जी०कर० चिकित्सालये दुष्कर्म-हत्या-सम्बद्ध-प्रकरणयो: एकमेव अवष्टब्ध: जन: सञ्जय: रॉय: अद्य कोलकाताया: सियालदाह्-न्यायालयेन अद्य चतुर्दश-दिवासानां कृते कारगृहे सम्प्रेषित:।

******

महाराष्ट्र-पीएम

प्रधानमन्त्री नरेन्द्रमोदी रविवासरे महाराष्ट्रस्य जलगांव-नगरस्य यात्रां करिष्यति। प्रधानमन्त्री एकादश-लक्षाभ्य: नूतन-लखपति दीदी इत्येताभ्य: प्रमाणपत्रं वितरिष्यति। असौ एतासु काभिश्चित् महिलाभि: सह संवादमपि करिष्यति।

******

राष्ट्रि यमानवधिकारायोग

राष्ट्रियमानवाधिकारायोगेन अनकापल्ली-जनपदे एकस्मिन् नैजोद्योगिक-एकांशे जाते विस्फोटे श्रमिकानां मृत्युप्रकरणे आन्ध्र-प्रदेशस्य मुख्यसचिवाय आरक्षि-महानिदेशकाय च सूचना प्रख्यापिता। राष्ट्रियमानवाधिकारयोगेन सूचनायां गहन-निरीक्षणाय निर्देश: दत्त: यत् औद्योगिक-एकांशस्य स्वामिना सर्वेषां सुरक्षा-मानदण्डानां विधि सम्बद्ध-प्रावधानानाञ्च कठोरतया पालनं क्रियते वा न तथा सम्बन्धिताधिकारिभि: सम्यक्-निरीक्षणं क्रियते वा न। सहैव अधिकारिभ्य: सप्ताहद्वयाभ्यन्तरे एकं विस्तृतप्रतिवेदनं प्रेषणाय निर्देश: प्रदत्त:।

******

उत्कर्षमहोत्सव:

केन्द्रीयसंस्कृतविश्वविद्यालय - तिरुपतिसंस्कृतविश्वविद्यालय-श्री लाल बहादुर शास्त्रि राष्ट्रियसंस्कृत विश्व विद्यालयानां संयुक्ततत्वावधाने अस्य चतुर्विंशत्त्यधिक द्वि सहस्रतमवर्षस्य द्विदिवासत्मकस्य उत्कर्ष महोत्सवस्य आयोजनं श्रीलाल बहादुर शास्त्रि राष्ट्रीय संस्कृत विश्व विद्यालयस्य नेतृत्वे नवदिल्लीस्थे अखिलभारतीय तकनीकी शिक्षापरिषदि जातम्| एतस्मिन् महोत्सवे केन्द्रीयवस्त्रमन्त्री गिरिराजसिंहः त्रयाणां संस्कृतविश्वविद्यालयानां कुलपतयः पद्मश्री सम्मानेन सम्मानितः चमू कृष्ण शास्त्री वर्यः अन्ये च प्राध्यापकाः शोधर्थिनः विद्यार्थिनः च इत्यादयः उपस्थिताः आसन् | एतस्यां राष्ट्रिय संवाद गोष्ठ्यां विभिन्नानि सत्राणि आयोजितानि | सत्रेषु विकसितभारतसङ्कल्पसाधकं संस्कृतं इत्यस्य प्रमुख शीर्षकस्य अन्तर्गतं भारतीय भाषाः

भारतीय ज्ञान परम्परा शोधः संस्कृतच्छात्राणां आजीविका सन्दर्भः नवीना  राष्ट्रिय शिक्षा नीतिः इत्यादयः विषयाः समाविष्टा: आसन् | द्वितीय दिवसे संपूर्ति सत्रे भारतप्रशासनस्य पूर्वकेन्द्रीयमन्त्री ड . महेन्द्र नाथ पाण्डेयः  अथ च लोक सभा सांसद: सुश्री बान्सुरी स्वराज: उपस्थितौ आस्ताम् | अत्रावसरे अनेके विद्वद्भिः  स्वीयबहुमूल्यवचनैः  संस्कृतभाषायै संवर्धनाय अनेके विषयाः पदक्षेपाः च उत्थापिताः | सहैव सहस्राधिकं छात्राः सोत्साहं भागं स्वीकृतवन्तः |

।। इति  वार्ता: ।।